M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1497

Title: Kashy Khanda
(Skandapurana)

1497

Incomplete

C Skandapurane: Kas'ikhanda
(Gangāsahasra)

	:	:	: **Author**
	:	:	: Title
	:	:	: Editor
	:	:	: Year, Vols.
	:	:	: Publisher
1497	:	: Pages 10 – 14	: Remarks

folios 10 – 14.

महोर्मिमालिनी मुक्ता महादेवी मनोन्मनी। महापुण्योदयप्राप्या मायापातितिमिरध्वं-
सिका ॥४०॥ महाविद्या महामाया महामेधा महौषधं। मालाधरी महापाया महो-
रगविलेपणा ॥४१॥ महामोहप्रशमनी महामंगलमंगलं। मार्तंडमंडलचरी म-
हालक्ष्मी मदोज्झिता ॥४२॥ यशस्विनी यशोदा च योगपा मुक्तात्मसेविता। योगसि-
द्धिप्रदा यज्ञा यज्ञेशा परिपूजिता ॥४३॥ यज्ञेशी यज्ञफलदा यजनीया यजेस्करी।
यमिसेव्या योगगम्या निर्योगिनी युक्तबुद्धिदा ॥४४॥ योगज्ञानप्रदा युक्ता यमाद्यष्टांग-
योगयुक्। यंत्रिताघौघसंचारा यमलोकनिवारिणी ॥४५॥ यासायातप्रशमनी या-
तनाविगलंतनी। यामिनी शाहिमा छेदैः युगधर्मविवर्जिता ॥४६॥ रेवती रतिकृद्रम्या
[illegible]नारी रमा रतिः। रत्नाकरप्रेमपात्रं रसज्ञा रसरूपिणी ॥४७॥ रत्नप्रसादगर्भा

[illegible]मणीयसंगिणी। रत्नाधीरूढरमणी रागद्वेषविनाशिनी॥५४॥ रसा वासा रम्यरू
पा रोगिणी वानुरूपिणी। रुचिरुत्रोचनी रुच्याऽरुचिरा रोगहारिणी। राजहंसा र
ववती राजन्नक्षत्रोलराजिका। रमणीयकरेरवावरूजारी रोषशोषणी। लोकप्र
स्ः लोकिवंद्या लोलत्कल्लोलमालिनी। लीलावती लिंगभूमि लोकलोचनतां
गा। लोकबंधुलोकिधात्री लोकित्रयगुणोर्जिता। लोकत्रयहिता लोकालक्ष्मी
लक्षणलक्षिता। लीलालक्षितनिर्वाणलावण्यामृतवर्षिणी। वैश्वानरी वा
सवेद्या वंध्यतापरिहारिणी। पश्चावास्तुदेवाङ्घ्रिरेणुघ्नी वज्रिवज्रनिवारिणी॥
शुभावती शुभफला शांतिः शंतनुवल्लभा। शूलिनी शैशववया शीतलामृ गं॰स॰
तवाहिनी॥ शोभावती शीलवती शोषिताशेषकिल्बिषा॥५५॥ शरण्या शिवदा १०

शिष्टा शरजन्मप्रसूः शिवा। शक्तिः शशांकविमला शमनस्वसृसम्मता। [illegible]
मा शमनमार्गघ्नी शितिकंठमहाप्रिया। शुचिः शुचिकरी शुद्धिः शेषशायिपद[illegible]
॥५६॥ श्रीनिवासा श्रुतिः श्रद्धा श्रीमती श्रीः शुभव्रता। शुद्धविद्या शुभावर्ता शातानं[illegible]
श्रुतिस्तुतिः॥५७॥ शिवेतरघ्नी शबरी शांबरीरूपधारिणी। श्मशानशोधिनी। शां
ता शश्वच्छतधृति स्तुता॥५८॥ शालिनी शालिशोभाढ्या शिखिवाहनगर्भभृत्॥
शंसनीयचरित्रा शातिताशेषपातका। षड्गुणैश्वर्यसंपन्ना षडंगश्रुतिरूपि
णी। षंढताहारिसलिला स्त्यायन्नदनदीशता। सरिद्[illegible]सुप्रभा सुरदी
र्घिका। स्वः सिंधुः सर्वदुःखघ्नी सर्वव्याधिमहौषधं। सेव्यसे[illegible]स्तुः सुस्कंद
स्वच्छसरस्वती। [illegible]तरंगिणी स्तुत्या स्थाणुमौलिकृतास्पदा। [illegible]स्थे [illegible]दा स्तुनगा।

सौख्यास्त्रीषुसौभाग्यदायिनी।स्वर्गनिःश्रेणिकास्तुल्यासुधास्वाहासुधाजला।६४।
समुद्ररूपिणीस्वर्ग्यासर्वपातकवैरिणी।स्मृताघहारिणीसीता[illegible]पाराब्धितरंडकं
।६५।सौभाग्यसुंदरीसंध्यासर्वसारसमन्विता।हरप्रियाहृषीकेशीहंसरूपाहिर
ण्मयी।।६६।।हृताघसंघ्याहितकृद्देलाहेवाकिगर्वहृत्।क्षेमदाख्यालिताघौघा
क्षुद्रविद्राविणीक्षमा।६७।इतिनामसहस्रंहिगंगायाःकलशोद्भवाकीर्त्तयित्वान
रःसम्यक्गंगास्नानफलंलभेत्।सकृज्जपादवाप्नोतिस्वैकक्रतुफलंमुने।सर्व
तीर्थेषुयःस्नातःसर्वपर्वसुदीक्षितः।६९।तस्यतत्फलमुद्दिष्टंत्रिकालपठनाद्व
तः।७०।सर्वव्रतेषुयत्पुण्यंसम्यक्चीर्णेषुवाडव।तत्फलंसमवाप्नोतित्रिसंध्यं काशी॰गं॰
नियतपठन्।७१।स्नानकालेपठेद्यस्तुयत्रकचजलाशये।तत्रसंनिहिता[illegible]गा। ११

त्रिपथगामिनी।७२।श्रेयोर्थीलभतेश्रेयोधनार्थीलभतेधनं।कामीकाममवाप्नोतिमो
मोक्षार्थीमोक्षमाप्नुयात्।७३।वर्षंत्रिकालंजपन्श्रद्धयाशुचिमानसः।ऋतुका[illegible]।अभि
गमनादपुत्रःपुत्रवान्भवेत्।७४।नाकालमरणंतस्यनाग्निचौरादिसाध्वसं।ना[illegible]स
हस्रंगंगायायोजपेच्छ्रद्धयामुने।७५।गंगानामसहस्रंतुजप्त्वाग्रामांतरंव्रजेत्।कार्य
सिद्धिमवाप्नोतिनिर्विघ्नोगेहमाविशेत्।७६।तिथिवारर्क्षयोगानांनदोषःप्रभवेत्त
दा।यदाजप्त्वाव्रजेदेतत्स्तोत्रंग्रामांतरंनरः।७७।आयुरारोग्यजननंसर्वोपद्रवना
शनं।सर्वसिद्धिकरंपुंसांगंगानामसहस्रकं।७८।जन्मांतरसहस्रेषुयत्पापंसमु
पार्जितं।गंगानामसहस्रस्यजपनात्तत्क्षयंव्रजेत्।७९।ब्रह्मघ्नो[illegible]मद्यपस्स्वर्णस्ते
यीचगुरुतल्पगः।तत्संयोगीभ्रूणहंतामातृहापितृहामुने।८०।विश्वासघा

सीगरदःकृतघ्नो।मित्रघातकः।अग्निदोगोवधकरोगुरुद्रव्यापहारकः।८१।महा
पातकयुक्तोपिसंयुक्तोप्युपपातकैः।मुच्यतेश्रद्धयाजप्त्वागंगानामसहस्रकं।८२।
आधिव्याधिपरिक्षिप्तोघोरतापपरिप्लुतः।मुच्यतेसर्वदुःखेभ्यःस्तवस्यास्यानुकी
र्तनात्।८३।संवत्सरेणयुक्तात्माजपन्भक्तिपरायणः।अभीप्सितांलभतेसिद्धिं
सर्वपापैःप्रमुच्यते।८४।संशयाविष्टचित्तस्यधर्मविद्वेषिणोपिच।दांभिकस्यापि
हिंस्रस्यचेतोधर्मपरंभवेत्।८५।वर्णाश्रमाचाररतःकामक्रोधविवर्जितः।
यत्फलंलभतेज्ञानीतदाप्नोत्यस्यकीर्तनात्।८६।गायत्र्ययुतजप्येनयत्फलं
समुपार्जितं।सकृत्पठनतःसम्यक्तदशेषमवाप्नुयात्।८७।गांदत्वावेदविदुषे गं॰स॰
यत्फलंलभतेकृती।तत्पुण्यंसम्यगाख्यातंस्तवराजसकृज्जपात्।८८।गुरुशुश्रू १२

षणंकुर्वन्यावज्जीवंनरोत्तमः।यत्पुण्यमर्जयेत्तद्भाक्वर्षंत्रिषवणंपठन्।वेदपाराय
पुण्यंयदत्रपरिपठ्यते।तत्षण्मासेनलभतेत्रिसंध्यंपरिकीर्तनात्।गंगायाःस्तव।[illegible]
स्यप्रत्यहंपरिशीलनात्।शिवभक्तिमवाप्नोतिविष्णुभक्तोथवाभवेत्।सर्वत्रपूज्योभव
तिसर्वत्रविजयीभवेत्।सर्वत्रसुखमाप्नोतिजाह्नवीस्तोत्रपाठतः।९३।यःकीर्त्तयेदनु
दिनंगंगानामसहस्रकं।तत्समीपेसहचरीगंगादेवीसदाभवेत्।९४।सदाचारीसविज्ञे
यःसशुचिस्तुसदैवहि।कृतसर्वसुरार्चःसःकीर्त्तयेद्यइमांस्तुतिं।९५।तस्मिन्तृप्तेभवे
त्तृप्ताजाह्नवीनात्रसंशयः।तस्मात्सर्वप्रयत्नेनगंगाभक्तंसमर्चयेत्।९६।स्तवराज रा
मिमंगांगंशृणुयाद्यस्तुवैपठेत्।श्रावयेदथतद्भक्तान्दंभलोभविवर्जितः।९७।मुच्य
तेत्रिविधैःपापैःमनोवाक्कायसंभवैः।क्षणान्निष्पापतामेतिपितॄणांचप्रियः

—त।सर्वदेवप्रियश्चापिसर्वर्षिगणसेवितं।अंतेविमांरुह्य दिव्यस्त्रीशतसंयुतः नमा
।दिव्याभरणसंपन्नोदिव्यभोगसमन्वितः॥नुजमानेषु विमेषुश्चा-कालेविशेषत
:॥२००॥जपन्निदंमहास्तोत्रंपितृणांमुक्तिकारकं।यावंतितत्रसिकतानियावन्तोंबुक
णाःस्थिताः॥२०१॥तावंत्येवहिवर्षाणिमोदंतेस्यपितामहाः॥यथाप्रीणंतिपितरोगया
यांपिंडदानतः॥२०२॥तथैवतृप्तिंयुस्त्राद्धेस्तवस्यास्यानुसंश्रवात्॥३॥एतत्स्तोत्रंगृहे
यस्यलिखितंपरिपूज्यते।तत्रपापभयंनास्तिशुचित्वंतद्भवनंसदा।अगस्त्येकिंबहूक्ते
नशृणुमेनिश्चयंवचः॥४॥संशयोनात्रकर्त्तव्यःसंदेग्धरिफलंनहि।५।यावंतिमर्त्ये गं.स.
स्तोत्राणिमंत्रजातान्यनेकशः।तावंतिस्तवराजस्यगांगायस्यसमानिनग।६।याव २९
ज्जन्मजयद्भक्तुनाम्नामेतत्सहस्रकं।सकीटकेष्वपिमृतोनपुनर्गर्भमाविशे॥७॥

नित्यंनियमवानतद्योजपेत्स्तोत्रमुत्तमं।अन्यत्रापिविपन्नस्सगंगातीरेमृतोभवेत।
।८।एतत्स्तोत्रवरंपुण्यंपुराप्रोक्तंपिनाकिना।विष्णवेनिजभक्तायमुक्ति[illegible]जाक्षरा
स्पदं।९।गंगास्नानप्रतिनिधिस्तोत्रमेतन्मयोदितं।सस्नाउंजाह्नवींतस्मात्ततएतत्
स्तोत्रंजपेत्सुधीः॥२१०॥ ॥इतिश्रीस्कंदपुराणेकाशीखंडेअगस्त्यस्कंदसंवादे गंगा
सहस्रनामएकोनत्रिंशत्तमोध्यायः॥ ॥छ॥ ॥श्रीकाशीविश्वेश्वरोजयति॥ ॥

काशी